'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 6th Semester Examination, 2023

## DSE-P3-SANSKRIT

Time Allotted: 2 Hours Full Marks: 60

*The figures in the margin indicate full marks.*

**The question paper contains DSE-3A and DSE-3B.**
**Candidates are required to answer any *one* from the *two* papers and they should mention it clearly on the Answer Book.**

## DSE-3A

1. संस्कृतभाषया देवनागरीलिप्या च द्वयोः प्रश्नयोः उत्तरं प्रदेयम् – 12×2 = 24

(क) मनुसंहितायाः प्रथमाध्यायमाश्रित्य कालविभागं युगविभागं पर्यालोचयत।

(ख) चतुर्वर्णानां कर्माणि आलोच्य तेषु ब्राह्मणस्य श्रेष्ठत्वं प्रतिपादयत।

(ग) ब्रह्मणः स्वरूपमालोचयत।

2. संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या (एकस्य) 6×1 = 6

(क) तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे॥

(ख) आपो नारा इति प्रोक्ता आपो वै नरसुनवः।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥

3. बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) 6×2 = 12

(क) त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयम्भुवः।
अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो॥

(ख) अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थं ऋग्यजुः सामलक्षणम्॥

(ग) यं तु कर्मणि यस्मिन् स न्ययुङ्क्त प्रथमं प्रभुः।
स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः॥

4. संस्कृतभाषया देवनागरीलिप्या च टिप्पनी लैखनीया (चतुर्णाम्) 3×4 = 12

जगदुत्पत्तिक्रमः, मनोरुत्पत्तिः, महाप्रलयस्थितिः, जरायुजाः, कर्मेन्द्रियाणि, चतुष्पाद् धर्मः।

5. संस्कृतभाषया देवनागरीलिप्यां षण्णां संक्षिप्तोत्तरं प्रदेयम् – 1×6 = 6

(क) मनुसंहितायाः प्रख्यातः टीकाकारः कः?

(ख) किं नाम त्रिगुणम् ?

(ग) के तावद् पञ्चमहायज्ञाः ?

(घ) के तावद् स्वेदजाः ?

(ङ) वायोः प्रादुर्भावः कुतः अभवत् ?

(च) मनोर्मते वृक्षस्य संज्ञा का ?

(छ) भूतानां के प्राणिनः श्रेष्ठा ?

(ज) मनुसंहिता कीदृशः ग्रन्थः ?

(झ) स्वयम्भुवः कः ?

## DSE-3B

## Unit-I

1. संस्कृतभाषया देवनागरीलिप्या च एकस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) 'अथवा स्थितिरियं दुर्जनानाम्'– दुर्जनानाम् का स्थितिः हितोपदेशग्रन्थमवलम्ब्य सविस्तारम् आलोचयत।

(ख) गृध्रमार्जारकथामालोच्य तस्याः उपदेशः व्याख्येयः।

2. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) 3×2 = 6

(क) षड्दोषाः पुरूषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥

(ख) लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते।
लोभात् मोहश्च नाशश्च लोभः पापस्य कारणम्॥

(ग) रूपयौवनसम्पन्ना विशालकुलसंभवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः॥

3. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) संसारविषवृक्षस्य द्वे एव रसवत्फले।
काव्यामृतरसास्वादः सङ्गमः सुजनैः सह॥

(ख) आलस्यं स्त्रीसेवा सरोगता जन्मभूमिवात्सल्यम्।
सन्तोषो भीरुत्वं षड् व्याघाता महत्त्वस्य॥

4. संस्कृतभाषया देवनागरीलिप्या षण्णां संक्षिप्तोत्तरं प्रदेयम् 1×6 = 6

(क) कः पण्डितः ?

(ख) हितोपदेशग्रन्थस्य रचनाकारः कः ?

(ग) दरिद्रस्य कानि शून्यस्थानानि सन्ति ?

(घ) धनस्य का कार्यकारिता ?

(ङ) कस्मिन् देशे वासः अनुचितः ?

(च) हितोपदेश इति ग्रन्थे कति कथाः सन्ति ?

(छ) सुहृद्गुणाः के ?

(ज) कः सर्पवत् परिहर्तव्यः ?

## Unit-II

5. संस्कृतभाषया देवनागरीलिप्या च एकस्योत्तरं प्रदेयम् – 12×1 = 12

(क) पञ्चतन्त्रमधिकृत्य उपदेशसहयोगेन एका कथा आलोचनीया।

(ख) दन्तिलगोरम्भकथांस्वभाषया लेखनीया।

6. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (द्वयोः) 3×2 = 6

(क) भये वा यदि वा हर्षे सम्प्राप्ते यो विमर्शयेत्।
कृत्यं न कुरूते वेगान्न स सन्तापमाप्नुयात्॥

(ख) शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः।
जन्मिनो मानहीनस्य तृणस्य च समगतिः॥

(ग) सूवर्णपुष्पां पृथिवीं चिन्वन्ति पुरूषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।

7. संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(क) न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः।
एतदेवात्र पाण्डित्यं यत्स्वल्पाद्भूरिरक्षणम्॥

(ख) पुज्यते यदपूज्योऽपि, यदगम्योऽपि गम्यते।
वन्द्यते यदवन्द्योऽपि, स प्रभावो धनस्य च॥

8. संस्कृतभाषया देवनागरीलिप्या च षण्णां संक्षिप्तोत्तरं देयम् – 1×6 = 6

(क) अमरशक्तेः कति पुत्राः आसन् ? तेषां नामानि लिखत।

(ख) दाक्षिणात्यजनपदस्थितस्य नगरस्य नाम किमासीत् ?

(ग) राजा सचिवान् आहुय किं प्रोवाच ?

(घ) कः आसीत् सुमतिः ?

(ङ) धनसम्पादनस्य कति उपायाः सन्ति नामानि लिखत।

(च) कतिविधं वाणिज्यं अर्थागमाय स्यात् ?

(छ) दमनकः कः आसीत् ?

(ज) कः ऊषरभूमिरिव विद्यते ?

(झ) पञ्चतन्त्रग्रन्थे कति भेदाः सन्ति नामानि लिखत।

——×——